**दीप्त्र** त्रि॰ दीप्ताय दीपनाय हितम् गवा॰ यत्। दीप्तिहिते।

**दीप्य** पु॰ दीपाय अग्निदीपनाय हितम् अपूपा॰ पक्षे यत्। १यमान्यां २जीरके च राजनि॰। ३रुद्रजटायाम् अमरः ४प्रदीपहितादौ त्रि॰।

**दीप्यक** पु॰ दीप्य+संज्ञायां कन् स्वार्थे क वा। १अजमोदायां २यमान्यां ३मयूरशिखायां रुद्रजटायाञ्च मेदि॰।

**दीप्र** त्रि॰ दीप–र। दीप्तिशीले "हिंस्रेषु दीप्रास्त्रधरः कुमारः" "ज्ञातीनव्यालदीप्रास्त्रः सुत्वनः परिपूजयन्" भट्टिः

**दीर्घ** पु॰ दृ–विदारे बा॰ घञ् घस्य नेत्त्वम्। १आयते (लम्बा) परिमाणभेदयुते दीर्घत्वञ्च परिमाणभेदे इति कणादाः महत्त्वावान्तरभेद इति सांख्याः। तथा हि कणाद सू॰ उपस्कारवृत्तौ च परिमाणसत्तां व्यवस्थाप्य सकारणं महत्त्वादिकं व्यवस्थापितं यथा "अणोर्महतश्चोपलब्ध्यनुपलब्धी नित्ये व्याख्याते" सू॰। "नित्ये इति विषयेण विषयिणं नित्यत्वप्रतिपादकं चतुर्थाध्यायमुपलक्षयति उपलब्ध्यनुपलब्धी इति यथायोगमन्वयः "येन यस्याभिसम्बन्धो दूरस्थस्यापि तस्य सः" न्यायात् तदेवं स्थूलो नीलः कलस इति प्रात्यक्षिकप्रत्यये यथा नीलं रूपं विषयस्तथा परिमाणमपि तेन च परिमाणेन परमाणुपर्य्यन्तं परिमाणमनुमीयते द्रव्यत्वाच्च किञ्च द्रव्यप्रत्यक्षतायां रूपवत् परिमाणमपि कारणं न हि महत्त्वमन्तरेण द्रव्यं प्रत्यक्षं भवति तथाच द्रव्यप्रत्यक्षकारणत्वेन स्वयञ्च प्रत्यक्षतया परिमाणं गुणोऽस्तीति निश्चीयते, यदि हि घटादिस्वरूपं परिमाणं स्यात् तदा महदानयेत्युक्ते घटमात्रमानयेत् तथा च प्रैषसंप्रतिपत्ती विरुध्येयाताम्, एवं घटपदात् परिमाणं प्रतीयेत परिमाणपदाद्वा घट इति। मानव्यवहारासाधारणकारणत्वं द्रव्यसाक्षात्कारकारणविषयनिष्ठसामान्यगुणत्वं वा महत्त्वं मानव्यवहारोऽत्र हस्तवितस्त्यादिव्यवहारो न तु पलसङ्ख्यादिव्यवहारः। तच्च परिमाणञ्चतुर्विधं महत्त्वमणुत्वं दीर्घत्वं ह्रस्वत्वञ्च, तत्र परममहत्त्वपरमदीर्घत्वे विभुचतुष्टयवर्त्तिनी परमाणुत्वपरमह्रस्वत्वे परमाणुवर्त्तिनी अवान्तराणुत्वावान्तरह्रस्वत्वे द्व्यणुकवर्तिनी त्रसरेणुमारभ्य महावयविपर्य्यन्तं महत्त्वदीर्घत्वे,। एवञ्च सर्वाण्यपि द्रव्याणि परिमाणद्वयवन्ति। विल्वामलकादावणुत्वव्यवहारः समिदिक्षुदण्डादिषु च ह्रस्वत्वव्यवहारो भाक्तः, भक्तिश्चात्र प्रकर्षभावाभावः। आमलके यः प्रकर्षभावस्तस्याभावः कुवले, विल्वे यः प्रकर्षभावस्तस्याभाव आमलके, स च गौणमुख्योभयभागित्वाद्भक्तिपदवाच्यः दीर्घत्वह्रस्वत्वे नित्ये न वर्त्तेते इत्येके, परिमाणे एव ते न भवत इत्यपरे, महत्तु दीर्घमानीयतामितिवत् महत्तु वर्त्तुलं त्रिकोणञ्चानीयतामिति निर्धारणवलाद्वर्त्तुलत्वादीनामप्यापत्तेरिति तेषामाशयात्। इदानीं परिमाणकारणानि परिसञ्चष्टे" उप॰ वृ॰ "कारणबहुत्वाच्च" सू॰ "चकारो महत्त्वप्रचयौ समुच्चिनोति, परिमाणमुत्पद्यते इति सूत्रशेषः, तत्र कारणबहुत्वं केवलं त्र्यणुके महत्त्वदीर्घत्वे जनयति महत्त्वप्रचययोस्तत्कारणेऽभावात् तच्च बहुत्वमीश्वरापेक्षाबुद्धिजन्यं तद्बुद्धेरनेकविषयत्वेऽप्यदृष्टविशेषोपग्रहो नियामकः। एवं परमाणुद्वयगतं द्वित्वं द्व्यणुके परिमाणोत्पादकं वक्ष्यते द्वाभ्यां तन्तुभ्यामप्रचिताभ्यामारब्धे पटे केवलं महत्त्वमेवासमवायिकारणं बहुत्वप्रचययोस्तत्राभावात्। यत्र च द्वाभ्यां तूलकपिण्डाभ्यां तूलकपिण्डारम्भस्तत्र परिमाणोत्कर्षदर्शनात् प्रचयः कारणं बहुत्वस्याभावात् महत्त्वस्य सत्त्वेऽपि परिमाणोत्कर्षं प्रत्यप्रयोजकत्वात्। एवञ्च सति यदि महत्त्वं तत्र कारणं तदा न दोषः तदुक्तम् "द्वाभ्यामेकेन सर्वैर्वा" इति। प्रचयश्च आरम्भकः संयोगः, स च स्वाभिमुखकिञ्चिदवयवासंयुक्तत्वे सति स्वाभिमुखकिञ्चिदवयवसंयोगलक्षणः, स चावयवसंयोगः स्वावयवप्रशिथिलसंयोगापेक्षः परिमाणजनकः गुणकर्मारम्भे सापेक्ष इति वचनात्" उप॰ वृ॰।

"एतेन दीर्घत्वह्रस्वत्वे व्याख्याते" सू॰ "अणुत्वमहत्त्वप्रक्रियां दीर्घत्वह्रस्वत्वयोरतिदिशति। ह्रस्वत्वदीर्घत्वे अपि न ह्रस्वत्वदीर्घत्ववती। महत्त्वोत्पादकमेव दीर्घत्वोत्पादकमणुत्वोत्पादकमेव ह्रस्वत्वोत्पादकम्, कारणैक्यात् कथं कार्य्यभेद इति चेन्न प्रागभावभेदेन पाकजवदुपपत्तेः यत्रैव महत्त्वं तत्र दीर्घत्वं यत्राणुत्वं तत्र नित्यं ह्रस्वत्वमित्याद्यतिदेशार्थः" उप॰ वृ॰। "अनित्येऽनित्यम्" सू॰। "इदानीं विनाशकमाह एतच्चतुर्विधमपि परिमाणं विनाशिनि द्रव्ये वर्त्तमानमाश्रयनाशादेव नश्यति न तु विरोधिगुणान्तरात्। घटे सत्यपि तत्परिमाणं विनश्यति कथमन्यथा कम्बुभङ्गेऽपि स एवायं घट इति प्रत्यभिज्ञेति चेन्न आश्रयनाशेन तत्र घटनाशावश्यकत्वात् न हि परमाणुद्वयसंयोगनाशाद् द्व्यणुके नष्टे तदाश्रितस्य त्रसरेणोस्तदाश्रितस्य चूर्णशर्करादेरविनाश इति युक्तिरभ्युपगमो वा, कथं तर्हि प्रत्यभिज्ञेति चेत्,